**SAMPLE QUESTION PAPER**

**वेदाध्ययनम् (Veda Adhyayan) (245)**

परीक्षासमयावधिः **(Time)** होरात्रयम् **(३ Hrs)** पूर्णाङ्काः **(Full Marks) - 100**

---

निर्देशाः **-**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 15, [C] भागे 6, [D] 6, [E] 4 इति आहत्य 51 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं – वस्तुनिष्ठ/बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् – वस्तुनिष्ठप्रश्नाः/ मेलनम्,रिक्तस्थानानि,सत्यम्- असत्यम् इत्यादि। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं 30 तः 50 शब्दानां परिधिमध्ये समाधेयाः।
7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

---

**[A]** प्रश्नसङ्ख्या १-२० बहुविकल्पप्रश्नाः सन्ति येषां कृते २० अङ्काः आवंटिताः भवन्ति। **1x20=20**

1. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) आर्यभाषा कतिविधा।

(क) द्विविधा (ख) त्रिविधा (ग) चतुर्विधा (घ) पञ्चधा।

(ii) भारतीया धर्मग्रन्थाः कया भाषया लिखिताः।

(क) संस्कृतभाषायाम् (ख) प्राकृतभाषायाम् (ग) हिन्दीभाषायम् (घ) तामिलभाषायाम्।

2. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) निरुक्तशास्त्रस्य रचयिता कः।

(क) शङ्कराचार्यः (ख) वाल्मीकिः (ग) व्यासदेवः (घ) यास्काचार्यः।

(ii)शुनःशेपस्य पितुः नाम किम्।

(क) वीरविक्रमः (ख) अजीगर्तः (ग) विश्वामित्रः (घ) पुरुरवा।

3. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) पुरुरवा काम् उपयेमे।

(क) मेनकाम् (ख) उर्वशीम् (ग) रम्भाम् (घ) वासवदत्ताम्।

(ii) मन्त्राः निरर्थकाः इति कस्य मतम्।

(क) कौत्सस्य (ख) यास्कस्य (ग) गार्ग्यस्य (घ) शाकटायनस्य।

4. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) निघण्टुशब्दस्य अर्थः कः।

(क) शब्दानां सूची (ख) वर्णसमुच्चयः (ग) वर्णागमः (घ) शब्दकोषः।

(ii)____________ देवताया एक आत्मा बहुधा स्तूयते।

(क) सौभाग्याद् (ख) ऐकात्म्याद् (ग) महाभाग्याद् (घ) विविधकारणाद्।

5. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) विश्वामित्रस्य पोष्यपुत्रस्य नाम किम्।

(क) अजीगर्तः (ख) शुनःशेपः (ग) वशिष्ठः (घ) पराशरः।

(ii) वेदः परमेश्वरस्य किंस्वरूपः।

(क) प्रज्ञास्वरूपः (ख) विद्यास्वरूपः (ग) शक्तिस्वरूपः (घ) मोदस्वरूपः।

6. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) केषां मते वेदः अपौरुषेयः।
(क) नैयायिकानाम्  (ख) वेदान्तिनाम्  (ग) नैयायिकानां वेदान्तिनां च
(घ) मीमांसकानां वेदान्तिनां च।
(ii) 'A new approch to the Vedas' इत्यस्य ग्रन्थस्य रचयिता कः।
(क) अरविन्दः  (ख) आनन्दस्वामी (ग) स्कन्दस्वामी  (घ) रामानुजः।

7. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) कस्मिन् दर्शने वेदः ईश्वरस्य वाणी।
(क) वैशेषिकदर्शने  (ख) न्यायदर्शने  (ग) वेदान्तदर्शने  (घ) मीमांसादर्शने।

8. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) 'तन्मित्रस्य वरुणस्याभिचक्षे' इति मन्त्रस्य क ऋषिः छन्दश्च किम्।
(क) कुत्सः, त्रिष्टुप्  (ख) कुत्सः, जगती  (ग) नारायणः त्रिष्टुप्  (घ) आदित्यः अनुष्टुप्।
(ii) संज्ञानसूक्तस्य ऋषेः नाम किम्।
(क) नारायणः  (ख) मधुच्छन्दाः  (ग) कुत्सः  (घ) संवननः।

9. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) चित्रम् इति शब्दस्य अर्थः कः।
(क) विविधम्  (ख) आश्चर्यकरम्  (ग) रम्यम्  (घ) दिव्यम्।
(ii) विश्वामित्रनदीसंवादसूक्ते पर्वतक्रोडात् के नद्यौ प्रवहतः।
(क) विपाट्-शुतुद्र्यौ  (ख) गङ्गायमुने  (ग) गोदावरीसरस्वत्यौ (घ) नर्मदाकावेर्यौ।

10. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) कः नदीः अरदत्।
(क) इन्द्रः  (ख) विश्वामित्रः  (ग) विपाट्  (घ) शुतुद्री।
(ii) सूर्यसूक्ते उषादेव्याः विशेषणं किम्?
(क) रोचमानाम्  (ख) दीप्यमानाम्  (ग) वर्तमानाम्  (घ) प्रकाश्यमानाम्।

11. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) 'चित्रं देवनामुदगादनीकम्' इत्यत्र उदगात् इत्यस्य अर्थः
(क) निर्गतम्  (ख) उदयं प्राप्तम्  (ग) उद्भासितम् (घ) अस्तं प्राप्तम्।
(ii) के इव यूयं सङ्गता भवत?
(क) स्तोतारः  (ख) देवाः  (ग) ऋषयः (घ) मनुष्याः।

12. 'समानो मन्त्रः समितिः समानी' इत्यत्र समितिः इत्यस्य अर्थः 1

(क) स्तुतिः (ख) प्राप्तिः (ग) अन्तःकरणम् (घ) ज्ञानम्।

13. लेहकारिण्या गवा सह कयोः तुलना विधीयते 1

(क) पुररवोर्वश्योः (ख) नदीविश्वामित्रयोः (ग) यमयम्योः (घ) विपाट्-शुतुद्र्योः।

14. 'प्रवाच्यं शश्वधा वीर्यम्' इत्यत्र शश्वधा इत्यस्य पदस्यार्थः। 1

(क) सर्वदा (ख) कदाचित् (ग) नियमेन (घ) नैरन्तर्येण।

15. 'उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत' इत्यत्र हन्तु इत्यस्य पदस्यार्थः। 1

(क) गच्छतु (ख) आगच्छतु (ग) नाशयतु (घ) भवतु।

16. 'ओ षु स्वसारः कारवे शृणोत' इति मन्त्रः कस्य सूक्तस्य - 1

(क) विश्वामित्रनदीसंवादसूक्तस्य (ख) सूर्यसूक्तस्य (ग) संज्ञानसूक्तस्य (घ) यमसूक्तस्य।

**17**. सञ्जभार इति पदे को धातुः। 1

(क) जृधातुः (ख) भ्रिधातुः (ग) भृधातुः (घ) भर्-धातुः।

**18.** युवसे इति रूपं कुत्र। 1

(क) यु+लोट् मध्यमपुरुषैकवचनम् (ख) यु+लट् मध्यमपुरुषैकवचनम्

(ग) युव्+लोट् मध्यमपुरुषैकवचनम् (घ) युव्+लट् मध्यमपुरुषैकवचनम्।

**19**. संरिहाणे इति पदे को धातुः। 1

(क) रिह्-धातुः (ख) लिह्-धातुः (ग) ऋह्-धातुः (घ) इङ्-धातुः।

20. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(i) जरितः इति रूपम्। -

(क) तृच्प्रत्ययान्तात् सम्बोधने (ख) तृन्प्रत्ययान्तात् सम्बोधने
ग) अस्प्रत्ययान्तात् सम्बोधने (घ) जस्प्रत्ययान्तात् सम्बोधने।

(ii) 'थट् च छन्दसि' इति कीदृशं सूत्रम्।

(क) संज्ञासूत्रम् (ख) परिभाषासूत्रम् (ग) नियमसूत्रम् (घ) विधिसूत्रम्।

**{B}** प्रश्नसङ्ख्या २१-३५ वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति, तदर्थं ३० अङ्काः आवंटिताः भवन्ति । **2x15=30**

**21**. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

(i) 'बहुलं छन्दसि' इति सूत्रेण रुट् आगमो विधीयते। (सत्यम्/ असत्यम्)

(ii)पञ्चथम् इत्यत्र कस्य स्थाने थटः स्थाने डट् प्रत्ययःभवति। (सत्यम्/ असत्यम्)

(iii)'स्यश्छन्दसि बहुलम्' इत्यत्र स्यः इति पदं लुप्तषष्ठ्यन्तम् अस्ति। (सत्यम्/असत्यम्)

(iv)'इकः सुञि' इत्यत्र मन्त्रे विषये इकः ह्रस्वः विधीयते। (सत्यम्/ असत्यम्)

**22**॰ निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

(i)एवा इत्यत्र दीर्घः ऋग्विषये चादिनिपातस्य दीर्घः। (सत्यम्/ असत्यम्)

(ii)धातृ नाम् इति स्थिते नामि सूत्रस्य अपवादः 'छन्दस्युभयथा' इति सूत्रम्। (सत्यम्/ असत्यम्)

(iii)आत्मन्-शब्दस्य आदेः लोपः आङि परे भवति। (सत्यम्/ असत्यम्)

(iv)ह्वर्-धातोः निष्ठायाम् ह्र इत्यादेशः भवति। (सत्यम्/ असत्यम्)

**23**॰ निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

(i) दुष्टम् आत्मन इच्छति इत्यर्थे वेदे दुरस्युः रूपम् भवति। (सत्यम्/ असत्यम्)

(ii) 'ससूवेति निगमे' इति सूत्रे ससूवेति प्रथमाविभक्त्यन्त पदम्। (सत्यम्/ असत्यम्)

(iii)'बहुलं छन्दसि' इति सूत्रस्य पञ्चमम् उदाहरणम् अस्ति। (सत्यम्/ असत्यम्)

(iv)प्रतरम् इति रूपं 'प्र-तरप्+अमु 'निष्पन्नम् भवति। (सत्यम्/ असत्यम्)

**24**॰ निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

(i) सधस्थम् इति रूपस्य व्युत्पत्तिः अस्ति- सह-स्था+क। (सत्यम्/ असत्यम्)

(ii) विभुवम् इति 'बहुलं छन्दसि' इति सूत्रस्य उदाहरणम्। (सत्यम्/ असत्यम्)

(iii) पूरुषः इति अन्येषामपि दृश्यते इति सूत्रस्य उदाहरणम्। (सत्यम्/ असत्यम्)

(iv)'छन्दस्यपि दृश्यते' इति सूत्रस्य आनट् उदाहरणम् अस्ति। (सत्यम्/ असत्यम्)

**25.** निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 2

(i)‘आज्जसेरसुक्’ इत्यत्र सन्धिविच्छेदः -आत् जसेः असुक् भवति। (सत्यम्/ असत्यम्)
(ii)उत्तभितम् इत्यत्र तभ्-धातुःअस्ति। (सत्यम्/ असत्यम्)

**26.** निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

(i)वेदे आः इति रूपं लोके आसीत् रूपस्य स्थाने प्रयोगं भवति। (सत्यम्/ असत्यम्)
(ii) ‘वा छन्दसि’ इति सूत्रेण दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात्। (सत्यम्/ असत्यम्)
(III)‘प्राणो अङ्गे अङ्गे अदीव्यत्’ इति ‘अवपथासि च’ इति सूत्रस्य उदाहरणम् अस्ति। (सत्यम्/ असत्यम्)
(iv) ‘एष स्य भानुः’ इति ‘स्यश्छन्दसि बहुलम्’ सूत्रस्य उदाहरणम् अस्ति।(सत्यम्/ असत्यम्)

**27.** निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

(i) ‘ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे’ विधिसूत्रमिदम्। (सत्यम्/ असत्यम्)
(ii) ‘पितरामातरा च छन्दसि’ विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति।(सत्यम्/ असत्यम्)
(iii) ‘मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ’ सूत्रो अयं विधिसूत्रम् नास्ति। (सत्यम्/ असत्यम्)
(iv)‘ऋभुक्षणम्’ वा षपूर्वस्य निगमे इति सूत्रस्य उदाहरणम् अस्ति। (सत्यम्/ असत्यम्)

**28.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। अधः द्वयोः सम्यक् उत्तरं दातव्यम् : 2

| | |
|---|---|
| (i) जनिता मन्त्रे - | (अ) प्रीणाहि |
| (ii) छन्दस्यपि दृश्यते | (ब) अवाप्सुः |
| (iii) बहुलं छन्दस्यमाङ्योगेऽपि | (स) आनट् |
| (iv) वा छन्दसि | (द) जनिता |

**29.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

| | |
|---|---|
| (i) छन्दस्यपि दृश्यते | (अ) अक्षीभ्याम् |
| (ii) ई च द्विवचने | (ब) इन्द्रो दधीचो अस्थभिः |

**30.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

| | |
|---|---|
| (i) बहुलं छन्दसि | (अ) ततुरिः |
| (ii) मीनातेर्निगमे | (ब) प्रमिणन्ति |

**31.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

(i) नित्यं छन्दसि (अ) अवीवृधत्

(ii) छन्दसीरः (ब) गीर्वान्

**32.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

(i) अनो नुट् (अ) कर्णवन्तः

(ii) नादघस्य (ब) सुपथिन्तरः

**33**. अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

(i) छन्दसि घस् (अ) ओ३म् अग्निमीळे पुरोहितम्

(ii) ओमभ्यादाने (ब) भाग ऋत्वियः

**34.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

(i) पूर्वं तु भाषायाम् (अ) उपरिस्विदासी३द्

(ii) उपरिस्विदासीदिति च (ब) अहिर्नु३ रज्जुर्नु

**35.** अधोलिखितानां सूत्राणां तेषां उदाहरणानां च मेलनं कुर्वन्तु। 2

(i) आतोऽटि नित्यम् (अ) महाँ इन्द्रो य ओजसा

(ii) छन्दसि वाऽप्राम्रेडितयोः (ब) अग्ने त्रातर्ऋतस्कविः इति गिरिर्न विश्वतस्पृथुः

**{C}** पंचानां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। **2x6-12**

36. यागः कतिविधः। के च ते। 2

अथवा

इष्टियागः केषां कृते नित्यः केषां कृते काम्यः इति।

37.कीदृशो दर्शपूर्णमासयागः। अत्र पुरोहितानां नामानि लिखत। 2

38.वि पथो वाजसातये इति परि तृन्धि पणीनाम् इति वा मन्त्रं सूक्तोल्लेखपुरःसरं पूरयत। 2

39.पश्य इत्यस्य उवाच इत्यस्य पदस्य वा व्युत्पत्तिः लेख्या। 2

40.'विचार्यमाणानाम्' इति सूत्रस्यार्थं लिखत। 2

41.तिङाकाङ्क्षमिति पदस्यार्थः कः। दस्यो३ दस्यो३ घातयिष्यामि त्वाम् इत्यत्र केन सूत्रेण प्लुतसंज्ञा। 2

**{D}**षट् अनतिदीर्घोत्तरैः समाधत्त। **3x6=18**

42.इन्द्रस्वरूपम् वर्णयत 3

अथवा

अग्निस्वरूपं वर्णयत।

43.वरुणस्वरूपम् वर्णयत। 3

44.'चरैवेति वैमा' इति 'आस्ते भग आसीनस्य' इति मन्त्रं वा प्रपूर्य यथाग्रन्थं व्याख्यात। 3

45.'ते वै पुत्राः पशुमन्तो' इति 'पुर एत्रा वीरवन्तो' इति मन्त्रं वा प्रपूर्य स्वभाषया सरलार्थं प्रसङ्गं च व्याख्यात। 3

46.'आम्रेडितं भर्त्सने' इति सूत्रं व्याख्यात। 3

47.'पाथोनदीभ्यां ड्यण्' इति सूत्रं यथाग्रन्थं व्याख्यात। 3

**{E}**चत्वारः दीर्घोत्तरैः समाधेयाः। **5x4=20**

48. होमम् इष्टिं वा समाश्रित्य स्वभाषया निबन्धः लेख्यः। 5

49.पूषन्सूक्तस्य ऊषस्सूक्तस्य वा सारं यथाग्रन्थं लिखत। 5

50.'भुवश्च महाव्याहृतेः' इति सूत्रम् यथाग्रन्थं व्याख्यात। 5

51.'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु' इति सूत्रम् सोदाहरणं स्वभाषया व्याख्यात। 5

--)(O)(--

वेदाध्ययनम् **(245)**

***Marking Scheme***

Marks : 100 Exam Duration :

3 hrs.

| S.N | Answer | Marks |
|---|---|---|
| 1. | (i) (क) द्विविधा<br>(ii) (क) संस्कृतभाषायाम् | 1 |
| 2. | (i) (घ) यास्काचार्यः<br>(ii) (ख) अजीगर्तः | 1 |
| 3. | (i) (ख) उर्वशीम्<br>(ii) (क) कौत्सस्य | 1 |
| 4. | (i) (क) शब्दाना सूची<br>(ii) (ग) महाभाग्याद् | 1 |
| 5. | (i) (ख) शुनःशेपः | 1 |

| | | |
|---|---|---|
| | (ii) (क) प्रज्ञास्वरूपः | |
| 6. | (i) (घ) मीमांसकानां वेदान्तिनां च।<br>(ii) (ख) आनन्दस्वामी | 1 |
| 7. | (i) (क) वैशेषिकदर्शने | 1 |
| 8. | (i) (क) कुत्सः, त्रिष्टुप्<br>(ii) (घ) संवननः। | 1 |
| 9. | (i) (ख) आश्चर्यकरम्<br>(ii) (क) विपाट्-शुतुद्र्यौ | 1 |
| 10. | (i) (क) इन्द्रः<br>(ii) (क) रोचमानाम् | 1 |
| 11. | (i) (ख) उदय प्राप्तम्<br>(ii) (ख) देवाः | 1 |
| 12. | (ख) प्राप्तिः | 1 |
| 13. | (घ) विपाट्-शुतुद्र्योः। | 1 |
| 14. | (क) सर्वदा | 1 |
| 15. | (क) गच्छतु | 1 |
| 16. | (क) विश्वामित्रनदीसंवादसूक्तस्य | 1 |
| 17. | (ग) भृधातुः | 1 |
| 18. | (ख) यु+लट् मध्यमपुरुषैकवचनम् | 1 |
| 19. | (ख) लिह्-धातुः | 1 |
| 20. | (i) (क) तृच्प्रत्ययान्तात् सम्बोधने<br>(ii) (घ) विधिसूत्रम्। | 1 |
| 21. | (i) सत्यम्<br>(ii) असत्यम्<br>(iii) सत्यम्<br>(iv) असत्यम् | 2 |
| 22. | (i) सत्यम्<br>(ii) सत्यम् | 2 |

| | | |
|---|---|---|
| | (iii) सत्यम्<br>(iv) सत्यम् | |
| 23. | (i) सत्यम्<br>(ii) सत्यम्<br>(iii) असत्यम्<br>(iv) सत्यम् | 2 |
| 24. | (i) सत्यम्<br>(ii) असत्यम्<br>(iii) सत्यम्<br>(iv) सत्यम् | 2 |
| 25. | (i) सत्यम्<br>(ii) असत्यम् | 2 |
| 26. | (i) सत्यम्<br>(ii) सत्यम्<br>(iii) असत्यम् (iv) असत्यम् | 2 |
| 27. | (i) सत्यम्<br>(ii) सत्यम्<br>(iii) असत्यम्<br>(iv) सत्यम् | 2 |
| 28. | (i) (द)<br>(ii) (स)<br>(iii) (ब)<br>(iv) (अ) | 2 |
| 29. | (i) (ब)<br>(ii) (अ) | 2 |
| 30. | (i) (ब)<br>(ii) (अ | 2 |
| 31. | (i) (ब)<br>(ii) (अ | 2 |

| | | |
|---|---|---|
| 32. | (i) (ब)<br>(ii) (अ | 2 |
| 33. | (i) (ब)<br>(ii) (अ | 2 |
| 34. | (i) (ब)<br>(ii) (अ | 2 |
| 35. | (i) (ब)<br>(ii) (अ | 2 |
| 36. | यागः पञ्चविधः। ते हि होमः इष्टिः पशुः सोमः सत्रश्च।<br>अथवा<br>ये निरन्तरं पूर्णिमायाम् अमावास्यायां च अस्य अनुष्ठानं कुर्वन्ति तेषां कृते नित्यः। ये च नित्यं न कुर्वन्ति, कामनासिद्ध्यर्थमेव कुर्वन्ति तेषां कृते तु काम्यः इति। | 2 |
| 37. | दर्शशब्दस्य सूर्येन्दुसङ्गमः अमावस्या इत्यर्थः। पौर्णमासी नाम पूर्णिमा। अमावस्यायां पूर्णिमायां च क्रियमाणः इष्टियागस्य प्रकृतियागः दर्शपूर्णमासः। अत्र होता अध्वर्युः अग्नीध्रः, ब्रह्मा चेति चतस्रः पुरोहिताः। | 2 |
| 38. | 'वि पथो वाजसातये' इति मन्त्रः पूषन्सूक्ते विद्यते। अत्र सम्पूर्णो मन्त्रो हि -<br>वि पथो वाजसातये चिनुहि वि मृधो जहि।<br>साधन्तामुग्र नो धियः॥इति।<br>अथवा<br>'परि तृन्धि पणीनाम्' इति मन्त्रः पूषन्सूक्ते विद्यते। अत्र सम्पूर्णः मन्त्रो हि -<br>परि तृन्धि पणीनामारया हृदया कवे।<br>अथेमस्मभ्यं रन्धय॥इति। | 2 |
| 39. | दर्शनार्थकाद् दृश्-धातोः लोट्-लकारे मध्यम-पुरुषस्य एकवचने पश्य इति रूपम्।<br>अथवा<br>परिभाषणार्थकाद् वच्-धातोः लुङ्-लकारे प्रथमपुरुषस्य एकवचने उवाच इति रूपम्। | 2 |

| | | |
|---|---|---|
| 40. | 'विचार्यमाणानाम्' इति सूत्रस्यार्थः तावत् - 'विचार्यमाणाना वाक्यानां टेः प्लुतः स्यात्।' इति। अत्र होतव्यं दीक्षितस्य गृहा३ इ इति उदाहरणम्। | 2 |
| 41. | तिङाकाङ्क्षमिति पदस्य साकाङ्क्ष तिङ् इत्यर्थः। दस्यो३ दस्यो३ घातयिष्यामि त्वाम् इत्यत्र 'आम्रेडितं भर्त्सने' इति सूत्रेण प्लुतसंज्ञा | 2 |
| 42. | इन्द्रस्वरूपम्<br>क) इन्द्रशब्दव्युत्पत्तिः, ऋग्वेदे इन्द्रस्तुतिः।<br>ख) सम्वराद्यसुरविनाशनम्, वृत्रनाशेन जलपातः इत्यादि इन्द्रकार्यम्।<br>अथवा<br>अग्निस्वरूपम्<br>क) अग्निशब्दव्युत्पत्तिः, ऋग्वेदे अग्निस्तुतिः।<br>ख) हविर्वहनम्, देवाह्वानम् इत्यादिकम् अग्निकार्यम्। | 3 |
| 43. | वरुणस्वरूपम्<br>क) ऋग्वेदे दवादशसु सूक्तेषु वरुणस्य स्तुतिः विद्यते।<br>ख) वरुणः नैतिकजगतः नियमस्य रक्षकः। तस्यैव नियन्त्रणेन सूर्य-चन्द्र-नक्षत्रादीनि स्वीयकक्षे एव आवर्तन्ते। | 3 |
| 44. | क) चरैवेति मन्त्रपूरणम्।<br>ख) ब्राह्मणः मां विचारणाय उक्तवान् इति चिन्तयित्वा रोहितः चतुर्थसंवत्सरम् अरण्ये व्यचरत् इत्यादिः सरलार्थः।<br>अथवा<br>क) आस्ते भगेति मन्त्रपूरणम्।<br>ख) यः जनः आसनस्थः भवति तस्य भाग्यमपि आसनस्थं भवतीत्यादिः सरलार्थः। | 3 |
| 45. | क) 'ते वै पुत्राः पशुमन्तो' इति मन्त्रपूरणम्।<br>ख) हे मधुच्छन्दःप्रमुखाः कनिष्ठपुत्राः ये यूयम् इत्यादिकं व्याख्यानम्।<br>अथवा<br>क) 'पुर एत्रा वीरवन्तो' इति मन्त्रपूरणम्।<br>ख) हे गाथिना गाथिपौत्राः पुरः एत्रा युष्माकम् इत्यादिकव्याख्यानम्। | 3 |
| 46. | क) 'आम्रेडित भर्त्सने' इत्यस्य सूत्रस्यार्थः।<br>ख) सूत्रव्याख्यानम्।<br>ग) उदाहरणसङ्गमनम्। | 3 |

| | | |
|---|---|---|
| 47. | क) 'पाथोनदीभ्या ड्यण्' इति सूत्रार्थः।<br>ख) पदद्वयात्मके सूत्रे पाथोनदीभ्याम् इति पञ्चमीद्विवचनान्तम् इत्यादिपदकृत्यादि-व्याख्यानम्।<br>ग) उदाहरणसङ्गमनम्। | 3 |
| 48. | होमः<br>क) होमस्वरूपम्, तत्र प्रकृतिः अग्निहोत्रयागः।<br>ख) अग्निहोत्रस्य स्वरूपं वैशिष्ट्यं च।<br>ग) आहुतिद्रव्याणि।<br>घ) ब्राह्मणकर्तव्यम्।<br>इष्टिः<br>क) इष्टिस्वरूपम्, तत्र प्रकृतिः दर्शपूर्णमासः।<br>ख) दर्शपूर्णमासस्वरूपं वैशिष्ट्यं च।<br>ग) शतपथब्राह्मणमतम्। | 5 |
| 49. | पूषन्सूक्तस्य सारः<br>क) पूषन्सूक्तप्रसङ्गः।<br>ख) पूषदेवस्य स्वरूपम्।<br>ग) आयुधवर्णनम्।<br>घ) पूषदेवात् रक्षणप्रार्थनम्।<br>ङ) प्रार्थना।<br>अथवा<br>रोहितेन्द्रसंवादः<br>क) रोहितेन्द्रसंवादप्रसङ्गः।<br>ख) वार्तालापे द्वितीयपर्यायः।<br>ग) वार्तालापे तृतीयपर्यायः।<br>घ) वार्तालापे चतुर्थपर्यायः। | 5 |
| 50. | क) 'भुवश्च महाव्याहृतेः' इति सूत्रप्रसङ्गः।<br>ख) सूत्रार्थः।<br>ख) सूत्रव्याख्या।<br>ग) उदाहरणम्।<br>घ) विशेषः। | 5 |
| 51. | क) 'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु' इति सूत्रप्रसङ्गः।<br>ख) सूत्रार्थः।<br>ख) सूत्रव्याख्या।<br>ग) उदाहरणम्।<br>घ) विशेषः। | 5 |